# वातस्य विकारा नेत्ररोगाश्च

**रघुनन्दन शर्मा**
शोधछात्र (ज्योतिष विभाग)
ज.रा.रा.सं. विश्वविद्यालय, जयपुर

वायुः शरीरान्तःसञ्चारेण स्वान्यतरधातून् पित्तकफमलादीन् गतिशीलान् करोति। वायोः प्रभावादेव पित्तकफादयः स्वप्रभावान् प्रकटयितुं क्षमन्ते। एवं चेत् वातस्य भूमिका मानवशरीरे सर्वाधिक महत्वपूर्णा भवति। अयमेव हि वायुः दोषाणां दोषधातुमलानां नेता अर्थात् प्रेरकोऽप्युक्तः। शरीरसंघटनाया वायोः प्रभावः तदीय-रजोगुणात्मकत्वात् सविशेषो भवति। तथाहि शिरोधमन्याद्यान्त्रशौषिर्यसम्पादने वायोरेव कर्त्तृत्वं स्वीकृतम्। यथोक्तमायुर्विज्ञानरत्नाकरे कविराजेन योगेन्द्रनाथेन-

**“ असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः।**
**तं पच्यमानं पित्तेन वायुश्चाप्यनु धावति।।**

**ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्च देहिनः।**
**उदरे पच्यमानानामाध्मानाद्बुक्ससारवत्।।**

**कफशोणितमांसानां सारो जिह्वा प्रजायते।**
**यथास्वमूष्मणा मुक्तो वायुः स्रोतांसि दारयेत्।।**

**अनुप्रविश्य पिशितं पेशोर्विभजते तथा।**
**मेदसः स्नेहमादभ्य शिरा स्नायुत्वमाप्नुयात्।।**

**शिराणाञ्च मृदुःपाकः स्नायूनां च खरस्तथा।**
**आशय्याभ्यासयोगेन करोत्याशयसम्भवम्।।”**

आचार्यश्चरको वायौ रुक्षत्वं शीतत्वं लघुत्वं सूक्ष्मत्वं चलत्वं विशदत्वं खरत्वञ्चेति सप्त गुणान् स्वीकरोति।

तत्र भावमिश्रमतानुसारेण रूक्षो वायुः प्रायः कफहरो भवति। शीतो वायुः विविधकार्यैः स्वास्थ्यलाभकरोऽभिमतः। अस्मिन् विषये सुश्रुत उल्लिखति-

**''ह्लादनः स्तम्भनः शीतो मूर्च्छातृड्दास्वेदजित्''**

लघुवायुरपि लेखनो रोपणश्चाभिमतः। अर्थात् तेन क्लिन्नत्वापहारो भवति शरीरेऽपि लघुत्वं जायते वसाया एकस्थाने एकत्रीकरणं नैव भवति। व्रणादीनां रोपणं चापि शीघ्रतया संजायते। केषांचन मतानुसारं लघुवायुरप्ययं पथ्यो भवति कफघ्नो भवति शीघ्रपाचकश्च भवति। तेनाग्निमान्द्यादयो न भवन्ति।

सूक्ष्मो वायुः सूक्ष्मतावशात् शरीरस्य सूक्ष्मातिसूक्ष्मस्त्रोतस्सु शीघ्रतया प्रविश्य प्रभावानुत्पादयति। सूक्ष्मशिरादिषु रक्तसञ्चरणतन्त्रस्य सक्रियतायै अस्य वायोः महत्वं प्रतिपादितमस्ति।

स्थिरविपरीतो वायुश्चल उच्यते। अयं हि वायुश्चलत्वेन देहान्तः सर्वत्रैव अबाधिविपरितुं समर्थो भवति। प्राण पानयोरप्ययमेष गतिप्रदो भवति। स्वयमेष विशदो वायुरपिच्छिलो भवति। धूलिस्पर्शवत् स्पर्शगुणविशिष्टश्च वर्णितः। आचार्य सुश्रुत उल्लिखति अस्य विषये-

**'विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः।।'**

अर्थात् विशदो वायुः क्लेदस्य शोषणं करोति व्रणञ्च रोपयति।

खरोवायुरश्लक्ष्णो भवति। गोजिह्वास्पर्शवत् स्पर्शगुणविशिष्टश्चाप्यसावुक्तः। हस्तपरामर्शेणायमेवमनुभूयते।

एवं सप्तगुणविशिष्टो वायुः प्राणिशरीरे हितावहो भवति, अतएवाचार्यः चरकः कथयति स्वसंहितायाम्-

**''वायुरायुर्बलं वायुः वायुर्धाता शारीरिणाम्।**
**वायुर्विश्वमिदं सर्वं प्रभुर्वायुश्च कीर्तितः।।''**

रोगाणां हेतुभूतेषु पित्तकफरक्तादिषु प्राधान्येन विद्यमानत्वादयमेव शरीरान्तःसञ्चारी वायुः रोगसमूहस्य सम्राट् इत्युक्तः। यतो हि अतिशीघ्रमेवायं विपदुत्पादयति। स्तोकमपि विकृतश्चेत् सर्वानर्थहेतुभविति। यथोक्तं वाग्मटाचार्येण अष्टाङ्गहृदये-

**''सर्वार्थानर्थकरणे विश्वस्यास्यैककारणम्।**
**अदुष्टः दुष्टपवनः शरीरस्य विशेषतः।।**

**स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः।**
**स्रष्टा धाता विभुर्विष्णुः संहर्त्ता मृत्युरन्तकः।।**

वातप्रकृतिकमनुष्याणां नेत्ररोगसन्दर्भे प्रकृत्या तदीयनेत्रयोरवस्थितिः कीदृशी भवति इति विषये लिखितं वर्तिते यत् वातप्रकृतिकस्य नेत्रे बभ्रुपिङ्गले भवतः रूक्षे भवतः पूर्णतया वृत्ताकृतौ भवतः। दृष्टिश्च स्थैर्यापन्ना भवति यथोक्तम्-

**नेत्राणि चैषां खरधूसराणि**
**वृत्तान्यचारूणि मृतोपमानि।**
**उन्मीलितानीव भवन्ति सुप्ते**
**शैलद्रयाँस्वे गगनञ्च यान्ति।।**

एवं वातस्य प्रभावो नेत्रेष्वपि सविशेषो भवति। यत्प्रभावात् केवलं नेत्राणाम् आकृतिः वर्णो वा, अपितु क्रियाऽपि सविशेषा जायते। अविकृतश्चेन्न दुष्प्रभावः किंतु विकृतश्चेदयमेव वायुः नेत्रपीडां करोति कदाचित् नेत्रशोथं जनयति कदाचित् नेत्रयोः गुरुत्वमनुभावयति। यद्यत्यन्तं कुपितस्तदा तेजोमान्द्यमापद्यते। नेत्रस्य बहिर्मण्डले अन्तर्मण्डले वाऽपि विविधां विकृतिं जनयति। कदाचित् कृष्णतारकं नेत्रान्तर्वर्तिनमपि अकर्मण्यं करोति तेन दर्शनशक्तिः सहसा क्षीयते। सामान्यप्रभावे तु रात्र्यन्धकत्वम् उपपद्यते किन्तु विशेषप्रभावे दिवाऽप्यन्धत्वानुभवो भवति।

न केवलं चक्षुरिन्द्रियेऽपितु सर्वेष्विन्द्रियेषु विकृतवायोः प्रभावो दुष्परिणामकरो भवति इति आयुर्वेदज्ञा मन्यन्ते। उक्तञ्च-

''प्रकृतिस्थो हि वायुर्बुद्धीन्द्रिय पञ्चानां चक्षुकर्णनासाजिह्वत्वगात्मकानां अधिष्ठानेषु अवस्थितानां विषयग्रहणप्रयोजकानां स्नायुजालानां बलं विधाय विषयग्रहणोचिते काले तत्तादिन्द्रियाधिष्ठानेषु इन्द्रियैः सह मनः संयोज्य च मनोऽधिष्ठितैस्तैस्तैरिन्द्रियैः स्वरूपविषयान् रूपशब्दगन्धरसस्पर्शरूपान् ग्राहयति। विकृतः स एव तत्तदिन्द्रियाधिष्ठानस्थितानि विषयग्रहणप्रयोजनानि स्नायुजालोनि विकरोति। शोषयति वा तथा मनश्च अस्थिरीकरोति ततश्च मानवास्तदा तथाविधेन चञ्चलेन मनसा सह विकृतस्नायुजालानाम् इन्द्रियाणां स्थिरभावेन संयोगाभावात् यथायथ-विषयग्रहणे समर्था न भवन्ति, अस्थिरस्य मनसः क्षणमपि कस्मिंश्चिदपि इन्द्रिये स्थिरतथा अवस्थान शक्तेरभावात् मनोऽधिष्ठितानामेवेन्द्रियाणां रूपग्रहणाधिकाराच्च।''1

वातस्य विकृतत्वे हेतवः

सामान्यतया वातस्य विकृतत्वे षड् हेतवोऽभिमताः सन्ति-

1) **मार्गावरोधः** – शरीरे पञ्चमार्गाणि सन्ति श्वासमार्गः आहारमार्गः रक्तमार्गः मूत्र-मार्गः मलमार्गश्च। एषु मार्गेषु यः वायुः सच्चरति तत्र किञ्चिदपि अवरोधो यदि भवति, तदा स वायुः कुपितो भवति रोगाँश्च उत्पादयति।

2) **वेगावरोधः** - क्षुत्-छिक्का-मल-मूत्रादयो वेगाः। एषां वेगानामवरोधेनापि वायुः प्रकुपितो भवति। अतएवोक्तं-'न वेगान् धारयेद् धीमान्' इति। वेगावरोधेन कुपितोऽपि वायुः तत्तत्स्थानविशेषेषु रोगान् उत्पादयति।

3) **दुश्चिन्ताः** - दुःखातिशयेन सह क्रियमाणं दीर्घकालिकं चिन्तनं दुश्चिन्ता इत्युच्यते। दुश्चिन्तयापि कदाचिद् वायुः प्रकुपितो भवति स्नायुगतो भूत्वा रोगान् उत्पादयति। अस्मिन् विषये आचार्यश्चरको ऽप्याह-

**''सर्वाङ्गकाङ्गरोगाॅश्च कुर्यात् स्नायुगतोऽनिलः।''**

4) **धातुक्षयः** - प्रमेहादिरोगादपि कदाचिद् धातुक्षयो भवति, तदा तेनापि वायुः प्रकुपितो भवति। धातुक्षये इन्द्रियदौर्बल्यातिशयात् रोगविशेषाणां प्रादुर्भावः सहजो भवति

5) **उपदंशः** - उपदंशोऽपि रोगश्रेणिक एव मन्तव्यः। अनेनापि दुष्प्रभावितो वायुः मानवशरीरान्तःसंचरितोऽपि कदाचित् कुपितो भूत्वा वृक्क-यकृत आन्त्रप्रभृतिषु विविधान् रोगान् उत्पादयति।

6) **मिथ्याहार विहारौ** – अभक्ष्यभक्षणं मिथ्याहारः स च वर्जनीयः शास्त्रेषु प्रोक्तःपुनरपि यदि गृह्यते तदा तेनापि वायुः प्रकुपितो भवेदिति पूर्णसम्भावना भवति। एवमेव मिथ्याविहारेण अनुचितस्थानेषु भ्रमणदिभिरपि वायुः प्रकुपितो रोग कारकश्च जायते।

## नेत्ररोगसन्दर्भे विकृतवायोः प्रभावः

यदा मस्तिष्के स्नायुजाले वायुः प्रकुपितो भवति तदा स वायुः नेत्रान्तः सञ्चरन् तत्रस्थं कफं प्रकुपितं करोति तदा शैत्यातिशयात् पित्तक्षयो भवति। पित्तश्चाग्निरूपः प्रकाशको भवति, अतएव तस्य क्षये प्रकाशन शक्तेः क्षीणतायाः प्रादुर्भावो भवति। आदौ सा क्षीणता न्यूना भवति, किन्तु यथा यथा वातप्रकोपो वर्धते तथा तथा पित्तनाशेन तस्यामभिवृद्धिर्भवति। अत्यधिकचित्तनशेन आन्ध्यमपि संजायते।

एवमेव यदा सः एव प्रकुपितो वायुः नेत्रान्तः सञ्चरन् तत्रस्थं पित्तं प्रकुपितं करोति, तदा पित्ताधिक्यात्

कफक्षयाश्च शैत्याभावे अश्रुपातादयो जायन्ते। अश्रूणां आधिक्येन निस्सरणात् नेत्रपार्श्वस्थजलविशोषणाच्चापि नैरन्तर्येणाश्रूणामाविर्भावेन दर्शनशक्तेः क्षीणता क्रमेण वृद्धिमाप्नोति। कदाचित् नेत्रान्तःस्थजलेऽपि कार्ष्ण्यं जायते तद्वशात् दर्शनशक्तिः स्वत एव विलुप्ता भवति।

आचार्यो वाग्भटः प्रकुपितानलप्रभावजन्यरोगेषु दृष्टिप्रमोहस्योल्लेखं करोति। तेन स्पष्टीभवति यन्नेत्ररोगाणामपि मूलकारको वायुरेवास्ति। यथा चोक्तंतन्मतं चिकित्साप्रदीपे-

**''आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः,**
**कण्ठध्वंसावसदौ श्रमकविलपनं स्त्रंसशूलप्रभेदाः।**

**पारुष्यं कर्णनादो विषयपरिणतिभ्रंशदृष्टिप्रमोहाः,**
**विस्पन्दोद्घट्टनानि ग्लपनमशयनं ताडनं पीडनञ्च।।**

**नामोन्नामो विवादो भ्रमणपरितपं जृम्भणं रोमहर्षो**
**विक्षेपाक्षेपशोषग्रहणशुषिरताच्छेदनं वेष्टनञ्च।**

**वर्णः श्यावोऽरुणो वा तृडपि च महती स्वापविश्लेषसङ्गाः**
**विद्यात्कर्माण्यमूनि प्रकुपितमरुतः स्यात्कषायो रसश्च।।**